**Series HRK/1**

**SET-4**

कोड नं.
Code No. **52/1**

रोल नं.
Roll No.

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **16** हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।
- Please check that this question paper contains **16** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

## सङ्कलनात्मकं मूल्याङ्कनम् - II

## SUMMATIVE ASSESSMENT-II

# संस्कृतम्

# SANSKRIT

*अवधिः : होरात्रयम्]* *[ पूर्णाङ्काः : 90*

*निर्धारित समय : 3 घण्टे]* *[ अधिकतम अंक : 90*

*Time allowed : 3 hours ]* *[ Maximum marks : 90*

खण्डः क : अपठितांश-अवबोधनम् (अपठितांश-अवबोधन) 15 अङ्काः

SECTION A : Unseen Reading Comprehension

खण्डः ख : रचनात्मककार्यम् (रचनात्मक-कार्य) 15 अङ्काः

SECTION B : Writing Skills

खण्डः ग : अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) 30 अङ्काः

SECTION C : Applied Grammar

खण्डः घ : पठित-अवबोधनम् (पठित-अवबोधन) 30 अङ्काः

SECTION D : Reading Comprehension

***निर्देशाः :***

***Instructions :***

*(i)* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*
*इस प्रश्न-पत्र में चार खण्ड हैं।*
*The question paper has four sections.*

*(ii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे।*
*The answers to each section must be written at one place.*

*(iii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*
*प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी।*
*Write the question number according to the question paper.*

*(iv)* *सर्वेषां प्रश्नानाम् उत्तराणि* ***संस्कृतेन*** *लेखनीयानि।*
*सभी प्रश्नों के उत्तर* ***संस्कृत*** *में लिखिए।*
*Answer all the questions in* ***Sanskrit.***

## खण्डः क (SECTION A)

## अपठितांश–अवबोधनम् (अपठितांश–अवबोधन)

**Unseen Reading Comprehension** **15 अङ्काः**

**1.** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित अनुच्छेद को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following passage and answer the given questions in Sanskrit.

श्रमस्य साहसस्य च योग्यः फलितांशः प्राप्यते। यदा भवान् मनसि लक्ष्यं चिन्तयित्वा धैर्यपूर्वकं निजकार्यं करोति तर्हि अवश्यमेव साफल्यं प्राप्तुं शक्नोति। अतएव कथ्यते – 'साहसे एव श्रीः प्रतिष्ठिता।' जीवने लाभालाभयोः विचारं विना परिश्रमः करणीयः। साहसिनः विद्यार्थिनः सदैव कर्मयोगिनः भूत्वा सम्यक्पदम् अलङ्कुर्वन्ति। साहसिनः जनाः सर्वदा सन्मार्गम् अनुसरन्ति। एते एव जनाः राष्ट्रोन्नयने समर्थाः भवन्ति।

**प्रश्नाः**

I. एकपदेन उत्तरत। 1×2=2

एक शब्द में उत्तर दीजिए।

Answer in one word.

(i) जीवने किं विचारं विना परिश्रमः करणीयः ?

(ii) राष्ट्रोन्नयने के जनाः समर्थाः भवन्ति ?

II. पूर्णवाक्येन उत्तरत। 2×2=4

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

(i) कः साफल्यं प्राप्तुं शक्नोति ?

(ii) के सम्यक्पदम् अलङ्कुर्वन्ति ?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत। ½×4=2

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए।

Choose and write the appropriate answer from the given options.

(क) 'साहसिनः' इति कस्य पदस्य विशेषणम् ?

(i) विद्यार्थिनः (ii) भवतः

(iii) परिश्रमस्य (iv) साहसस्य।

(ख) 'अलङ्कुर्वन्ति' इति क्रियापदस्य किं कर्तृपदं गद्यांशे प्रयुक्तम् ?

(i) जनाः (ii) विद्यार्थिनः

(iii) श्रमः (iv) योग्यः।

(ग) 'सर्वस्मिन् काले' इत्यर्थे किम् अव्ययपदं गद्यांशे प्रयुक्तम् ?

(i) अत एव (ii) सम्यक्

(iii) तस्मिन एव (iv) सर्वदा।

(घ) 'कुमार्गम्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(i) श्रेयमार्गम् (ii) प्रेयमार्गम्

(iii) सन्मार्गम् (iv) धैर्यपूर्वकेण।

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत। 2

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए।

Write the appropriate title for this passage in Sanskrit.

**2.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत।

निम्नलिखित श्लोक को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए।

Read the following shloka and answer the given questions in Sanskrit.

'अष्टादश – पुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्॥'

**प्रश्ना :**

I. एकपदेन उत्तरत। 1×1=1

एक शब्द में उत्तर दीजिए।

Answer in one word.

(i) पुराणानि कति सन्ति ?

II. पूर्णवाक्येन उत्तरत। 1×2=2

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

(i) पुण्यं किं भवति ?

(ii) पापं किं भवति ?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत। 1×2=2

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए।

Choose and write the appropriate answer from the given options.

(क) वचनद्वयं कस्य अस्ति ?

(i) रामस्य

(ii) मनुष्यस्य

(iii) व्यासस्य

(iv) कालिदासस्य।

(ख) 'उपकारः' इति पदस्य विलोमपदं किम् ?

(i) अपराजितः

(ii) अपयशः

(iii) अपकारः

(iv) उपयुक्तः।

## खण्डः ख (SECTION B)

## रचनात्मककार्यम् (रचनात्मक –कार्य)

**Writing Skills** **15 अङ्काः**

**3.** मित्रं प्रति अधोलिखितम् पत्रं मञ्जूषा–प्रदत्तशब्दैः पूरयित्वा पुनः लिखत। ½×10=5

मित्र को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिए गए शब्दों की सहायता से पूर्ण कर पुनः लिखिए।

Complete the following letter, written to your friend, with the help of the words given in the box and rewrite the same.

गङ्गा–छात्रावासः,

तिथिः ____________ ।

प्रिय मित्र ! (i) ______________

सस्नेहं नमः ।

अत्र कुशलं तत्रास्तु । गतसप्ताहे अस्माकं (ii) ____________ संस्कृतसम्भाषण–शिबिरम् (iii)____________ आसीत् । चतुर्दशदिनानि यावत् वयं संस्कृत–सम्भाषणस्य (iv) ____________ अकुर्म । तत्र एकस्याः लघुनाटिकायाः (v) ____________ अपि अभवत् । अहं तु विदूषकस्य (vi) ____________ कृतवान् । सर्वे जनाः हसित्वा हसित्वा (vii) ________ अकुर्वन् । अहम् इदानीं सर्वदा संस्कृतेन एव (viii) ________ । भवान् अपि संस्कृतेन सम्भाषणस्य अभ्यासं (ix) ________ । पितरौ (x) ________ मम प्रणामाञ्जलिं निवेदयतु ।

भवतः मित्रम्,

शेषनाथः ।


**मञ्जूषा**

| |
|---|
| अभिनयम्, अभ्यासम्, प्रति, विद्यालये, मञ्चनम्, |
| आयोजितम्, करतलध्वनिम्, वदामि, रमेश ! करोतु । |

**4.** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत । 2×5=10

नीचे दिए गए चित्र का वर्णन मञ्जूषा में दिए गए शब्दों की सहायता से **पाँच** संस्कृत वाक्यों में कीजिए ।

Describe the following picture in **five** Sanskrit sentences with the help of the words given in the box below.



**मञ्जूषा**

| |
|---|
| त्रयः, छात्राः, गावौ, वृषभौ, पतंगम्, उड्डायन्ति, शकटयाने, स्तः, वृक्षाः, शाकटिकः, ग्रामात् बहिः, निस्सरति। |

**अथवा (OR)**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य **पञ्चभि** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत।

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर **पाँच** वाक्यों में एक अनुच्छेद संस्कृत में लिखिए।

Write a paragraph in **five** Sanskrit sentences on the following topic with the help of the words given in the box.

**'जलस्य महत्त्वम्'**

**मञ्जूषा**

| |
|---|
| जलम्, क्षेत्राणाम्, विना, जीवने, स्नानाय, भोजनस्य, दुरुपयोगः, न, अस्माभिः, भोजनाद्, कर्तुं, क्षालनाय, दूषितेन, अपि, करणीयः, महत्त्वपूर्णम्। |

## खण्डः ग (SECTION C)

## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)

**Applied Grammar** **30 अङ्काः**

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत। 1×4=4

निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि अथवा सन्धि–विच्छेद करके लिखिए।

Write the underlined words of the following sentences after joining or disjoining Sandhis.

(i) यक्षः प्रति + एकम् जलपानात् निवारितवान्।

(ii) युधिष्ठिरः वने पिपासाकुलः अभवत्।

(iii) तत् + मनसि उत्साहस्य संचारःभवति।

(iv) सर्वैराजीवनम् क्रीडाः क्रीडितुं शक्यन्ते।

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत। 1×5=5

निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए।

Choose and write the correct compounded or expounded forms of the underlined words in the following sentences.

(क) वने पशुपक्षिणः निवसन्ति।
- (i) पशवः पक्षिणः
- (ii) पशवः च पक्षिणः च
- (iii) पशुः च पक्षी च।

(ख) विमूढा धीः यस्य सः पक्वं फलं त्यक्त्वा अपक्वं खादति।
- (i) धीविमूढा
- (ii) विमूढधीः
- (iii) विमूढीधीः।

(ग) तस्मिन् विद्यालये बहुफलः वृक्षः अस्ति।
- (i) बहूनि च फलानि च
- (ii) बहूनि फलानि
- (iii) बहूनि फलानि यस्मिन् सः।

(घ) सः यथाशक्ति कार्यं करोति।

(i) शक्तिसहितम्

(ii) शक्तिम् अनतिक्रम्य

(iii) शक्तिपूर्वकेण।

(ङ) किम् इदम् अनुरूपं साधुजनस्य ?

(i) योग्यम् रूपम्

(ii) रूपस्य योग्यम्

(iii) रूपे योग्ये।

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत। 1×5=5

निम्नलिखित वाक्यों में रेखाङ्कित पदों के प्रकृतिप्रत्ययों को जोड़कर या पृथक् करके उचित उत्तर विकल्पों में से चुनकर लिखिए।

Write the underlined words of the following sentences after joining or disjoining suffixes to the roots or words, selecting the correct answer from the options given below.

(क) शिक्षिका पठन्तं छात्रं फलं दर्शयति।

(i) पठ् + शतृ (ii) पठ् + आन् (iii) पठ् + शानच्।

(ख) मुद् +शानच् बालिकायै पारितोषिकं यच्छ।

(i) मोदमानायाः (ii) मोदमानायै (iii) मोदमाना।

(ग) सत्यभाषणस्य महत् + त्व सर्वे जानन्ति।

(i) महताम् (ii) महत्त्वम् (iii) महत्व।

(घ) जनाः दुष्टानां मूर्ख + तल् दृष्ट्वा उपहसन्ति।

(i) मूर्खतम् (ii) मूर्खताम् (iii) मूर्खतायाः।

(ङ) एका किशोर + ङीप् भरतनाट्यम् प्रस्तौति।

(i) किशोरा (ii) किशोरी (iii) किशोरीम्

**8.** अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखत। 1×5=5

निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति मञ्जूषा में दिए गए उचित अव्यय पदों के द्वारा कीजिए।

Fill in the blanks in the following sentences with appropriate indeclinable words given in the box.

(i) अहं ________ तरणताले तरिष्यामि।

(ii) सर्पः कोटरात् ________ आगच्छति।

(iii) मित्र रमेश! ________ ग्रीष्मावकाशे त्वं किं करोषि?

(iv) कोलाहलं ________ कुरु।

(v) कोकिलः ________ कूजति?

**मञ्जूषा**

| बहिः, मा, सम्प्रति, कदा, श्वः। |
|---|

**9.** उचितसंख्यापदं चित्वा वाक्यानि पूरयत। 1×5=5

उचित संख्या पद चुनकर वाक्य पूर्ण कीजिए।

Choose the correct numerical words and complete the sentences.

(i) वने ________ सिंहाः वसन्ति। (चतुरः चत्वारः, चतस्रः।)

(ii) ________ गायकाः गायन्ति। (त्रयः, त्रिस्रः, त्रीणि।)

(iii) विद्यालये ________ बालौ पुरस्कारं प्राप्तवन्तौ। (द्वे, द्वौ, द्वयोः।)

(iv) ________ चन्द्रः तमः हन्ति। (एकः, एकम्, एका।)

(v) अस्मिन् उपवने ________ आम्रवृक्षाः सन्ति। (पञ्चाशत्, पञ्चाशताः, पञ्चशती।)

**10.** अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा अशुद्धपदं संशोध्य लिखत। 1×6=6

निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध हैं। दिए गए विकल्पों में से उचित उत्तर चुनकर अशुद्ध पद को संशोधित कर लिखिए।

Choose the correct answer from the given options and correct the underlined incorrect word in the following sentences.

(क) 'सा <u>बालकः</u> खेलति।'

(i) बालकौ (ii) बालके

(iii) बालिका (iv) बालिके।

(ख) 'श्वः भवन्तः कुत्र गच्छथ ?'

(i) अगच्छन् (ii) गमिष्यन्ति

(iii) गच्छन्ति (iv) गमिष्यथ।

(ग) 'त्वं कदा राष्ट्रपतिभवनं द्रक्ष्यामः ?'

(i) पश्यथ (ii) पश्यावः

(iii) द्रक्ष्यसि (iv) द्रक्ष्यन्ति।

(घ) 'अस्मिन् पुस्तके सप्तदश पाठं सन्ति।'

(i) पाठाः (ii) पाठानि

(iii) पाठे (iv) पाठौ।

(ङ) 'द्वे छात्रे पुस्तकालये पठन्ति।'

(i) पठति (ii) पठतः

(iii) पठथः (iv) पठथ।

(च) 'त्वं मम मित्रम् अस्ति।'

(i) आसीत् (ii) असि

(iii) अभवत (iv) भविष्यति।

## खण्डः घ (SECTION D)

## पठित–अवबोधनम् (पठित–अवबोधन)

**Reading Comprehension** **30 अङ्काः**

**11.** अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।

निम्नलिखित गद्यांश, पद्य और नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।

Read the following prose, poetry and drama passages and answer the given questions in Sanskrit.

**(अ) गद्यांशः**

''कालोऽहम्। अहं खलु कालः। विश्वस्थ आत्माऽहम्। कलयामि गणयामि जगतः आयुः प्रमाणम्। सततं चक्रवत् परिवर्तमानः भूतं वर्तमानं भविष्यदपि च वीक्षमाणः अहमेव साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च। इदं जगत् तु पुनः पुनः जायते विलीयते च परमहं सर्वदा विद्यमानोऽस्य सर्वं क्रियाकलापं पश्यामि। अहो! किं जानीथ यूयम्, 'कियती प्राचीना इयं सृष्टिः ?' नैव, तर्हि शृणुत ध्यानेन।''

**प्रश्नाः**

I. एकपदेन उत्तरत। 1

एक शब्द में उत्तर दीजिए।

Answer in one word.

पुनः पुनः किं जायते ?

II. पूर्णवाक्येन उत्तरत। 1

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

कालः किं गणयति ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। 1×2=2

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए।

Choose and write the correct answer from the given options.

(क) 'जानीथ' इति क्रियापदस्य कर्तृपदं किम् ?

(i) सृष्टिः (ii) इयम्

(iii) यूयम् (iv) अहम्।

(ख) 'सर्वदा विद्यमानोऽस्य' अत्र 'अस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) वर्तमानाय (ii) कालाय

(iii) जायते (iv) जगते।

**(आ) पद्यम्**

''त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।

परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ।।''

**प्रश्नाः**

I. एकपदेन उत्तरत। 1

एक शब्द में उत्तर दीजिए।

Answer in one word.

अपक्वं फलं कः भुङ्क्ते ?

II. पूर्णवाक्येन उत्तरत। 1

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

विमूढधीः कीदृशं फलं परित्यज्य अपक्वं भुङ्क्ते ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। 1×2=2

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए।

Choose and write correct answer from the given options.

(क) 'भुङ्क्ते' इति क्रियापदस्य किं कर्तृपदं श्लोके प्रयुक्तम्?

(i) धर्मप्रदाम् (ii) विमूढधीः

(iii) पक्वम् (iv) फलम्।

(ख) 'धर्मप्रदाम्' इति पदस्य विशेष्यपदं किम्?

(i) वाचम् (ii) परुषाम्

(iii) पक्वम् (iv) फलम्।

**(इ) नाट्यांशः**

"राजहंसः – हुं! किमनेन? एतत् कार्यं तु कुक्कुटोऽपि करोति।

काकः – (विहस्य) कुक्कुटः! अरे अद्य कुतः कुक्कुटाः नगरेषु। अहमेव सर्वत्र सुलभः।

राजहंसी – भो भो वाचाल! स्वीयैः कटुभिः क्वणितैः जनजागरणात् अन्यत् तु किमपि न करोषि।

काकः – अहो अज्ञानं भवत्याः। अरे! यस्य गृहस्य भित्तौ स्थित्वा आलपामि, जनाः प्रियस्य आगमनसंकेतं मत्वा हृष्यन्ति। किं बहुना! अहं तु एतादृशः सत्यप्रियः यत् मातरः शिशून् कथयन्ति 'अनृतं वदसि चेत् काकः दशेत्।''

**प्रश्नाः**

I. एकपदेन उत्तरत। 1

एक शब्द में उत्तर दीजिए।

Answer in one word.

अद्य नगरेषु के दुर्लभाः?

II. पूर्णवाक्येन उत्तरत। 1

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence.

मातरः शिशून् किं कथयन्ति?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। 1×2=2

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए।

Choose and write the correct answer from the given options.

(क) 'कटुभिः' इति विशेषणपदस्य किं विशेष्यपदम्?

(i) राजहंसैः (ii) स्वीयैः

(iii) क्वणितैः (iv) जनजागराणात्।

(ख) 'हृष्यन्ति' इति क्रियापदस्य किं कर्तृपदम्?

(i) काकाः (ii) जनाः

(iii) राजहंसः (iv) प्रियस्य।

**12.** अधोलिखित**कथनानां** समुचितं भावं विकल्पेभ्यः चित्वा लिखत। 1×2=2

निम्नलिखित कथनों का समुचित भाव विकल्पों में से चुनकर लिखिए।

Choose and write the correct gist of the following sentences from the given options.

(क) 'मम कलनस्य आधारः तु सूर्य एव।'

(i) सूर्यः कालगणनां करोति।

(ii) सूर्यं विना कालस्य गणना असम्भवा।

(iii) काल एव सूर्यस्य गणनायाः आधारः।

(ख) 'सर्वस्तरतु दुर्गाणि, सर्वो भद्राणि पश्यतु।'

(i) दुर्गादेव्याः कृपया सर्वे संसारसागरं तरन्तु।

(ii) सर्वे जनाः दुर्गस्य पारं गच्छन्तु सुखिनः च भवन्तु।

(iii) सर्वे सङ्कटमुक्ताः स्युः कल्याणं मङ्गलं च पश्यन्तु।

**13.** मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोक**द्वयस्य** अन्वयं पूरयत। 1×4=4

मञ्जूषा में से समुचित पद चुनकर निम्नलिखित **दोनों** श्लोकों के अन्वय को पूर्ण कीजिए।

Complete the prose order of the following **two** shlokas by choosing the appropriate words given in the box.

(क) ''विद्वांसः एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।

अन्येषां वदने ये तु ते चक्षुर्नामनी मते ॥''

**अन्वयः** - (i) ____________ लोके विद्वांसः एव चक्षुष्मन्तः प्रकीर्तिताः।

(ii) ____________ वदने ये (चक्षुषी) ते तु चक्षुर्नामनी मते।

(ख) ''प्रार्थितं ते मया चक्रं देवदानवपूजितम्।
अजेयः स्यामिति विभो। सत्यमेवद् ब्रवीमि ते।।''

**अन्वयः** - विभो! अजेयः स्याम् इति मया देवदानव-पूजितम्
चक्रम् ते (iii) ____________। एतत् ते
सत्यम् (iv) ____________।

**मञ्जूषा**

| अन्येषाम्, प्रार्थितम्, ब्रवीमि, अस्मिन्। |
|---|

**14.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। 1×5=5

रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए।

Frame the questions on the basis of the underlined words :

(i) <u>धैर्यवान्</u> लोके न पराभवं प्राप्नोति।

(ii) <u>सर्वेषाम्</u> एव महत्त्वं विद्यते।

(iii) कृषकस्य क्षेत्रे <u>श्रमं</u> कृत्वा सः धनम् अर्जितवान्।

(iv) अरुणाचले अनेके <u>उत्सवाः</u> मान्यन्ते।

(v) अरूणाचलप्रदेशस्य राजधानी <u>ईटानगरम</u> अस्ति।

**15.** अधोलिखितवाक्यानि घटनाक्रमानुसारेण लिखत। ½×8=4

निम्नलिखित वाक्यों को घटनाक्रम के अनुसार लिखिए।

Write the following sentences in their sequential order.

(i) एकस्य विद्यालयस्य सभागारे प्रधानाचार्यः अध्यापकाः च उपविष्टाः।

(ii) जलपानानन्तरं ते एतानि स्थलानि द्रष्टुं गताः।

(iii) प्रक्षेपकयन्त्रेण तेन केषाञ्चिद् दर्शनीयस्थलानां परिचयः प्रदत्तः।

(iv) तदा तेन अस्य प्रदेशस्य प्रमुखोत्सवाः वर्णिताः।

(v) तत्र पर्यटनाधिकारी सभागतानां छात्राणाम् अभिनन्दनं करोति।

(vi) सर्वप्रथमं तेन अरुणाचलस्य प्रकृतेः सौन्दर्यं वर्णितम्।

(vii) पर्यटनाधिकारी प्रश्नोत्तरमाध्यमेन जिज्ञासां शमयितुम् इच्छति।

(viii) सर्वे छात्राः रम्यस्य प्रदेशस्य विषये ज्ञातुम् उत्सुकाः।

**16.** रेखाङ्कितपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत। 1×3=3

रेखांकित पदों के प्रसंगानुसार अर्थ चुनकर लिखिए।

Choose and write the contextual meanings of the underlined words.

(क) ‘परुषां वाचं न अभ्युदीरयेत्।’

(i) मधुराम्

(ii) पौरुषेयाम्

(iii) कठोराम्।

(ख) ‘कालस्य कलनस्य आधारः सूर्यः मन्यते।’

(i) कोलाहलस्य

(ii) जगतः

(iii) गणनायाः।

(ग) ‘काकस्य गात्रं यदि काञ्चनस्य।’

(i) ओष्ठौ

(ii) शरीरम्

(iii) मुखम्।